**शाल्मलीकन्द** पु० ६त०। तद्वृक्षमूले राजनि०। [राजनि०।

**शाल्मलीफल** पु० शाल्मल्या इव फलमस्य। तेजःफलवृक्षे

**शाल्मलीवेष्ट** पु० शाल्मलीं वेष्टयति वेष्ट–अण्। शाल्मली-निर्य्यासे मोचरसे रत्नमा०। ण्वुल्। तत्रैव। [इशग्रम्।

**शाल्व** पु० शाल–व। १देशभेदे हेमच०। तस्य २नृपे च भारते

**शाल्वण** पु० "काकोल्यादिः स वातघ्नः सर्वाम्लद्रव्यसंयुतः। सानूपौदकमांसस्तु सर्वस्नेहसमन्वितः। स चोष्णः स्पृष्टलवणः शाल्वणः परिकीर्त्तितः" सुश्रुतोक्ते औषधभेदे।

**शाव** पु० शव–घञ्। १शिशौ शब्दर०। स्वार्थे क। तत्रैव शवस्येदम् अण्। २शवसम्बन्धे त्रि० "त्रिरात्रं शावमाशौचम्" इति स्मृतिः।

**शावर** पु० शावयति विकारयति शव–णिच् अरन्। १पापे २अपराधे ३लोध्रद्रुमे च मेदि०। शवरेण प्रोक्तमण्। ४शवरस्वामिकृते मीमांसाभाष्ये। शवरस्येदम् अण्। ५शवरसम्बन्धिनि त्रि०।

**शावरभेदाख्य** न० शावरभेदस्याख्येव अच्समा० स्वार्थे अण्। ताम्रे हेमच०। तस्य तत्तुल्यरक्तवर्णत्वात्तथात्वम्।

**शावरी** स्त्री शवरस्य प्रिया अण् ङीप्। १शूकशिम्ब्यां मेदि०। २विद्याभेदे तन्त्रसा०। [ङीप्।

**शाश्वत** त्रि० शश्वद् भवः अण्। सतते नित्ये अमरः स्त्रियां

**शाष्कुल** त्रि० शष्कुलमिव मांसं भक्ष्यमस्य अण्। मांसाशिनि हेमच०। [अमरः।

**शाष्कुलिक** न० शष्कुलीनां समूहः ठञ्। शष्कुलीसमूहे

**शास** आशीर्वादे अदा० आत्म० सक० सेट् क्त्वा वेट्। प्रायेण आङ्पूर्वः। आशास्ते आशासिष्ट "इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे" उत्तरचरितोक्तेरन्यपूर्वोऽपि।

**शास** शासने अदा० पर० द्विक० सेट् क्त्वा वेट्। शास्ति अशासत्

**शासन** न० शास–ल्युट्। निकृष्टस्य हितसाधनादौ १प्रवर्त्तने २राजदत्तभूमौ ३राजलेख्यभेदे ४आज्ञौ च मेदि०।

**शासनहर** पु० शासनं हरति हृ–अच्। आज्ञाहारके दूते।

**शासित** त्रि० शास–तृच् इट्। शासनकर्त्तरि।

**शास्तृ** त्रि० शास–तृच् इडभावः। १शासनकर्त्तरि त्रिका०। २बुद्धे अमरः ३उपाध्याये ४नृपे ५पितरि संक्षिप्तसा०।

**शास्त्र** न० शिष्यतेऽनेन शास–ष्ट्रन्। १हितानुशासने ग्रन्थे शास्त्रं च वेदमूलकं सद्भिरादरणीयं नान्यत् यथोक्तं "अतो वेदविरुद्धार्थशास्त्रोक्तं कर्म संत्यजेत्। स्वबुद्धिरचितैः शास्त्रैः प्रतार्य्येह च बालिशान्। निघ्नन्ति श्रेयसो मार्गं लोकनाशाय केवलम्। निन्दन्ति देवता वेदांस्तपो निन्दन्ति सद्द्विजान्। तेन ते निरयं यान्ति असच्छास्त्रनिषेवणात्। श्रुतिस्मृतिसदाचारविहितं कर्म शाश्वतम्। स्वं स्वं धर्मं प्रयत्नेन श्रेयोऽर्थीह समाचरेत्। स्वबुद्धिरचितैः शास्त्रैर्मोहयित्वा जनं नराः। तेन ते निरयं यान्ति युगानां सप्तविंशतिम्" पद्मपु० १७ अ०। "पुराणं भारतं वेदधर्मशास्त्राणि यानि च। आयुषः क्षपणायैव धर्मतत्त्वेन चाचरेत्। पुत्रदारादिसंसारः पुंसां संमूढचेतसाम्। विदुषां शास्त्रसम्भारः सद्योगाभ्यासविघ्नकृत्। इदं ज्ञेयमिदं ज्ञेयं यः सर्वं ज्ञातुमिच्छति। अपि वर्षशतेनापि शास्त्रान्तं नाधिगच्छति। विज्ञायाक्षरतन्मात्रं जीवितञ्चापि चञ्चलम्। विहाय शास्त्रजालानि पारलौकिकमाचरेत्। पण्डितोऽपि हि मूर्खोऽसौ शक्तियुक्तोऽप्यशक्तिकः। यः संसाराच्च चात्मानं समुत्तारयितुं क्षमः" वह्निपु०। तामसशब्दे ३२७१ पृ० दृश्यम्।

"बहुशास्त्रालोकनेऽपि सारादानं षट्पदवत्" सांख्यप्र०सू०

**शास्त्रकृत्** पु० शास्त्रं करोति कृ–क्विप्। मन्वादिषु ऋषिषु त्रिका०।

**शास्त्रगत** पु० शास्त्रे गत इव। प्रघटाविदि त्रि०।

**शास्त्रचारण** पु० शास्त्रं चारयति प्रचारयति चर–णिच्–ल्यु। शास्त्रोक्ताचरणप्रचारकर्त्तरि शब्दर०।

**शास्त्रतत्त्वज्ञ** त्रि० शास्त्रतत्त्वं जानाति ज्ञा–क। १शास्त्रतात्पर्य्यवेत्तरि २ज्योतिषज्ञे शब्दर०।

**शास्त्रदर्शिन्** त्रि० दृश–णिनि ६त०। शास्त्रज्ञे शब्दर०। शास्त्रविदादयोऽप्यत्र।

**शास्त्रशिल्पिन्** त्रि० शास्त्रं तज्ज्ञानं शिल्पमिवाऽस्त्यस्य इनि। १शास्त्रज्ञानोपजीविनि २काश्मीरदेशे पु० त्रिका०।

**शास्त्रिन्** त्रि० शास्त्रं वेत्त्यधीते वा इनि। शास्त्रज्ञे।

**शास्त्रीय** त्रि० शास्त्रेण विहितः छ। शास्त्रोक्ते धर्मादौ।

**शास्य** त्रि० शास–ण्यत्। अनुशासनीये शिष्यादौ।

**शि** तेजने स्वा० उभ० सक० अनिट्। शिनोति शिनुते अशैषीत् अशेष्ट।

**शिंशपा** स्त्री शिवं पाति पा–क पृषो०। (शिशु) वृक्षे अमरः "शिंशपा कटुका तिक्ता कषाया शोफकारिणी। उष्णवीर्या हरेन्मेदःकुष्ठश्वित्रवमिकृमीन्। वस्तिव्रणदाहास्रबलासगर्भपातिनी" भावप्र०।

**शिक्कु** त्रि० शिच्–कु कस्य नेत्त्वम्। अव्यवसायिनि त्रिका०।